# சாத்துமுறை க்ரமம்

ओम्
श्रीमते रङ्गरामानुज महादेशिकाय नमः
श्रीमते श्रीनिवासरामानुज महादेशिकाय नमः
श्रीमते श्रीवेदांतरामानुज महादेशिकाय नमः
श्रीरामाजयम्

ओम् तद्विश्णोः परमं पदँसदा पश्यन्ति सूरयः। दिवीव चक्षुराततम ।तद्विप्रासो विपन्यवो जग्रुवाँसस्समिन्धते विष्णोर्यत्परमं पदम् ।
गृणाहि । घृतवती सवितराधिपत्यैः पयस्वतीरन्तिराशानो अस्तु ।
ध्रुवादिशां विष्णुपत्न्यघोरऽस्येशाना सहसोयामानोता ।
ब्रुहस्पतिर्मातरिश्चोतवायुस्सन्धुवाना वाता अभिनो ग्रुणन्तु।
विष्टम्भोदिवो धरुणः पृथिव्या अस्येशाना जगतोविष्णुपत्नि ।

பெரிய பெருமாள் ஸ்ரீரங்க நாச்சியார் संभावना ।
ஸ்ரீநிவாஸ பெருமாள் அலர்மேல் மங்கை தாயார் संभावना ।
பேரருளாளப்பெருமாள் பெருந்தேவி நாச்சியார் संभावना ।
ஆராவமுதப்பெருமாள் கோமளவல்லித்தாயார் संभावना ।
ருக்மிணி ஸத்யபாமா ஸமேத ஸ்ரீவேணுகோபாலப் பெருமாள் संभावना ।
பத்ரிநாராயணப்பெருமாள் அரவிந்தவல்லி தாயார் संभावना ।
பூவராஹப் பெருமாள் அம்புஜவல்லி தாயார் संभावना ।

चरणं पवित्रं विततं पुराणम् । येन पूतस्तरतिदुष्क्रुतानि । तेन पवित्रेण शुद्धेना पूताः । अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रम् । ज्योतिष्मद्भ्राजमानंमहस्वत् । अम्रुतस्यधारा बहुधा दोहामानम् । चरणं नो लोके सुधितां दधातु । प्रपन्नजनसन्तान कूटस्थरा ன நம்மாழ்வார் संभावना ।

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ।
वेदान्तविज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयःशुद्धसत्वाः।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।

दहरं विपाप्मं परवेश्म भूतं यत्पुन्डरीकंपुरमध्य सँस्थम् ॥
तत्रापि दहरं गगनं विशोकस्तस्मिन् यदंतस्तदुपासितव्यं ।
यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य
प्रकृतिलीनस्य यः परस्स महेश्वरः ।
दर्शन स्थपकர்ாள श्रीभाष्यकारர் संभावना ।

चरणं पवित्रं + सुधितां दधातु ।
श्रीमद् वेदमार्गप्रतिष्ठापनाचार्य सर्वतंत्रस्वतंत्रोभयवेदान्ताचार्य
श्रिभगवद्रामानुज सिद्दान्तनिर्धारण सार्वभौम
தூப்புல் वेदान्त देशिकन संभावना ।

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्गप्रतिष्ठापनाचार्यानां
परमहंसपरिव्राजकाचार्यानां सर्वतंत्र स्वतंत्रोभयवेदान्तचार्यानां
श्रीभगवद्रामानुज सिद्दान्तानिर्धारण सार्वभौमानां
श्रीमन्नादमुनि श्रीमद्यामुनमुनि श्रीमद्रामानुज मुनिरूप मुनित्रय सिद्दान्त स्थापकाचार्यानां
श्रीमद् श्रीगोपालार्य महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीवेदान्त रामानुज महादेशिकानां संभावना ।
(ஆவணி - பூரட்டாதி)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीवेदान्तरामानुज महादेशिक दिव्या कटाक्षलब्ध
सार्वज्ञानां श्रीमतां श्रीश्रीनिवास रामानुज महादेशिकानां संभावना ।
(ஐப்பசி - உத்திரட்டாதி)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीश्रीनिवास रामानुज महादेशिक दिव्य कटाक्षलब्ध
सार्वज्ञानां श्रीमतां श्रीश्रीनिवास महादेशिकानां संभावना ।
(மாசி - புஷ்யம்)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीश्रीनिवास महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीपदुकासेवक रामानुज महादेसिकानां संभावना ।
(காா்த்திகை - மகம்)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीश्रीनिवास महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीश्रीनिवास रामानुज महादेसिकानां संभावना ।
(ஆவணி - மூலம்)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीपदुकासेवक रामानुज महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीवेदान्तरामानुज महादेसिकानां संभावना ।
(ஆவணி - பூரட்டாதி)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीवेदान्तरामानुज महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीश्रीनिवास महादेसिकानां संभावना।
(புரட்டாசி - உத்திரட்டாதி)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीवेदान्तरामानुज महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीरङ्गनाथ महादेसिकानां संभावना।
(ஆவணி - ரேவதி)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीवेदान्तरामानुज महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीवेदान्तरामानुज महादेसिकानां संभावना।
(பங்குனி - புஷ்யம்)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीवेदान्तरामानुज महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीश्रीनिवासरामानुज महादेसिकानां संभावना।
(ஆவணி - உத்திரம்)

चरणं पवित्रं + सुधितां दधातु ।
न कर्मणा + यः परस्स महेश्वरः ।
श्रीमद् वेदमार्ग + स्थापकाचार्यनां
श्रीमद् श्रीवेदान्तरामानुज महादेशिक दिव्य कटाक्षलब्ध सार्वज्ञानां
श्रीमतां श्रीरङ्गरामानुज महादेसिकानां संभावना।
(வைகாசி - திருவாதிரை) வர்த்தமான ஸ்ரீமுஷ்ணம் ஆண்டவன்

सर्वदेश दशाकालेष्वव्याहतपराक्रमा ।
रामानुजार्यदिव्याज्ञा वर्धतामभिवर्धताम् ॥
रामानुजार्यदिव्याज्ञा प्रतिवासरमुज्वला ।
दिगन्तव्यापिनी भूयात् सा हि लोकहितैषिणी ॥
श्रीमन् श्रीरङ्गश्रियमनुपद्रवामनुदिनं संवर्धय ।
श्रीमन् श्रीरङ्गश्रियमनुपद्रवामनुदिनं संवर्धय ॥
नमो रामानुजार्याय वेदान्तार्थप्रदायिने ।
आत्रेयपद्मनाभार्यसुताय गुणशालिने ॥
रामानुजदयापात्रम ज्ञानवैराज्य भूषणम् ।
श्रीमद् वेङ्कटनाथार्यँ वन्दे वेदान्तदेशिकम् ॥
வாழியிராமனுசப்பிள்ளான் மாதகவால் வாழு மணிநிகமாந்தகுரு வாழியவன்,
மாறன் மறையுமிராமானுசன் பாடியமும், தேறும் படியுறைகக்குஞ் சீர்.

வஞ்சப்பர சமயம் மாற்ற வந்தோன் வாழியே,
மன்னுபுகழ் பூதூரான் மனமுகப்போன் வாழியே,
கஞ்சத் திருமங்கையுகக்கவந்தோன் வாழியே,
கலியனுரை குடிகொண்ட கருத்துடையோன் வாழியே,
செஞ்சொல்தமிழ் மறைகள் தெளிந்துரைப்போன் வாழியே,
திருமலைமால் திருமணியாய்ச் சிறக்கவந்தோன் வாழியே,
தஞ்சப்பரகதியை தந்தருள்வோன் வாழியே,
செந்தமிழ் தூப்புல் திருவேங்கடவன் வாழியே,
நானிலமுந் தான் வாழ நான் மறைகள் தாம் வாழ,
மாநகரின் மாறன் மறைவாழ, ஞானியர்கள்
சென்னியணிசீர்தூப்புல் வேதாந்த தேசிகனே,
இன்னும் ஒரு நூற்றாண்டிரும், வாழியணி தூப்புல்
வருநிகமாந்தாசிரியன், வாழியவன் பாதாரவிந்தமலர்
வாழியவன் கோதிலாத் தாண்மலரைக் கொண்டாடிக்கொண்டிருக்கும்,
தீதிலா நல்லோர் திரள்.

नमस्तस्मै श्रीनिवासलाक्ष्मनाह्वययोगिने ।
श्रीमद् वेदान्तरामानुजात्तसार्वज्ञशालिने ॥
देशिकेन्द्रदयापात्रं दासवात्सल्यशेविधम् ।
यतीन्द्रं श्रीश्रीनिवासमहादेशिक माश्रये ॥
வாழி திருவரங்க மாநகர் சீர்மாதகவால்
வாழி ஸ்ரீநிவாஸ முனிமாணடிகள்
வாழியவே வேதமொரு நான்கும் வியன்தமிழின்
மாமறையும் த□தற நங்கட்கருளும் சீர்.
வேதப் பகைச் சமயம் வேர்களைவோன் வாழியே,
வேதாந்த தேசிகன் போல் வீற வந்தோன் வாழியே,
நீதிநெறி தவறாமல் நிறுத்தினோன் வாழியே,
நேசமுடன் ஆசாரம் நீளவைத்தோன் வாழியே,
காதலுடன் தமிழ்மறையின் கருத்துரைப்போன் வாழியே,
கருதுதொண்டர் குழாத்தை நன்கு காத்தளிப்போன் வாழியே,
பூதபுரீசனை மனத்துட்பொருந்த வைப்போன் வாழியே,
புகழ் ஸ்ரீநிவாஸகுரு பூதலத்தில் வாழியே.
வேதயுகந்தான் வாழ வேதியர்கள் தாம் வாழ
ஏதமிலிராமாநுசன் வாழ, மாதவனார் மன்னிய கோவில்
ஸ்ரீநிவாஸனெனும் மாமுனியே இன்னுமொரு
நூற்றாண்டிரும்.

श्रीमान वेङ्कटनाथार्यः कविथार्किक केसरी ।
वेदान्ताचार्य वर्योमे सन्निधत्तां सदा हृदि ॥
श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्र्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥
सर्वतंत्रस्वतंत्राय सिंहाय कविवादिनाम् ।
वेदान्ताचार्यवर्याय वेङ्कटेशाय मङ्गलम् ॥
नमस्यमासि श्रोणाया मवतीर्णाय सूरये ।
विश्र्वामित्रान्वयायास्तु वेङ्कटेशाय मङ्गलम् ॥
पिता यस्यानन्तसूरिः पुण्डरीकाक्षयज्ज्वनः ।
पौत्रोयस्तनयस्तोतारम्बायास्तस्य मङ्गलम् ॥
वेङ्कटेशावतारोऽयं तद्घण्टांशोऽथवा भवेत् ।
यतीन्द्रांशोऽथ वेत्येवं वितर्क्यायास्तु मङ्गलम् ॥
श्रीभाष्यकारः पन्थान मात्मना दर्शितं पुनः ।
उद्धर्तुमागतो नून मित्युक्तायास्तु मङ्गलम् ॥
यो बाल्ये वरदार्यस्य प्राचार्यस्य परां दयाम् ।
अवाप्य व्रिद्धिं गमितस्तस्मै योग्याय मङ्गलम् ॥
रामानुजार्यादात्रेयान्मातुलात् सकलाः कलाः ।
अवाप विंशत्यब्दे यस्तस्मै प्राज्ञाय मङ्गलम् ॥
श्रुतप्रकाशिका भूमौ येनादौ परिरक्षिता ।
प्रवर्तिता च पात्रेषु तस्मै श्रेष्ठाय मङ्गलम् ॥
सांस्कृतीभिद्राविडीभिर्बह्वीभिः कृतिभिर्जनान् ।
यस्समुज्जीवयामास तस्मै सेव्याय मङ्गलम् ॥
यः ख्यातिलाभपूजासु विमुखो वैष्णवे जने ।
क्रयणीयदशां प्राप्तस्तस्मै भव्याय मङ्गलम् ॥
यस्मादेवमया सर्वं शास्त्रमग्राहि नान्यतः ।
तस्मै वेङ्कटनाथाय मम नाथाय मङ्गलम् ॥
पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च ।
प्राप्याय प्रापकायास्तु वेङ्कटेशाय मङ्गलम् ॥
यः कृतं वरदार्येण वेदान्ताचार्य मङ्गलम् ।
आशास्तेऽनुदिनं सोऽपि भवेन्मङ्गलभाजनम् ॥

ज्ञानानुष्ठानवैराग्यशेवधिःश्रितवत्सलः ।श्रीनिवासयतीन्द्रो मे सन्निधत्तां सदा हृदि ॥

वेदमार्गप्रतिष्ठात्रे वेदान्तज्ञानशालिने ।
श्रीनिवासयतीन्द्राख्य देशिकायास्तु मङ्गलम् ॥
परवादीभसिंहाय परिव्राजकभूभ्रुते ।
सर्वतंत्रस्वतंत्राय सर्वज्ञायास्तु मङ्गलम् ॥
द्रमिडोपनिषत्सारज्ञात्रे विद्वत्सुरद्रवे ।
विख्यातवैभवायास्तु देशिकेन्द्राय मङ्गलम् ॥
श्रीभाष्यकारसिद्धान्त महोदधिसुधांशवे ।
वेदान्ताचार्यसिद्धान्त वर्धकायास्तु मङ्गलम् ॥
रहस्यत्रयसारादिग्रन्थसारस्यवेदिने ।
राजीवसमनेत्राय यमिराजाय मङ्गलम् ॥
प्रपत्तिशास्त्रसारं य एको वेति महीतले ।
प्रपन्नार्तिहरायास्तु तस्मै बहुल मङ्गलम् ॥
नाथश्रीयामुनाचार्यो यश्च श्रीलक्ष्मणाह्वयः ।
तन्मुनित्रयसिद्धान्तस्थापकायास्तु मङ्गलम् ॥
रङ्गेशपदि वेदान्त लक्ष्मणाह्वय योगिना ।
समर्पितभरायास्तु सत्वोद्रिक्ताय मङ्गलम् ॥
यः कुंभमासि पुष्यर्क्षे ह्यवतीर्णश्शुभान्विते ।
तस्मै श्रीश्रीनिवासाख्य देशिकेन्द्राय मङ्गलम् ॥
शठजिच्छ्रीभाष्यकारो यश्च वेदान्तदेशिकः।
तदाचार्यत्रयांशाय तस्मै श्रेष्ठाय मङ्गलम् ॥
यतीन्द्रश्री श्रीनिवासरामानुज गुरूत्तमात् ।
अवाप्तसकलार्थाय गुरवे भूरि मङ्गलम् ॥
ज्ञानभक्तिविरक्तयादि कल्याणगुणशालिने ।
ज्ञानप्रदानोत्कण्ठाय तस्मै नाथाय मङ्गलम् ॥
धृतत्रिदण्डहस्ताय सूर्ध्वपुण्ड्रविशोभिने ।
शुभ्रश्रीयज्ञसूत्राय तस्मै शुद्धाय मङ्गलम् ॥
यस्यानुकम्पया मन्दोऽप्यद्धा व्याकृतिकृद्भवेत् ।
श्रीवास देशिकेन्द्राय तस्मै भवतु मङ्गलम् ॥
तद्देश्किकृपाभूम्ना श्रीरामकवि निर्मितम् ।
तन्मङ्गलम् सुपठतां मङ्गलम् भवति ध्रवम ॥
वेदशीर्ष रसज्ञाय वेदान्ताचार्यभक्तये ।
श्रीनिवास यतीन्द्राख्य देशिकाय नमो नामः ॥

वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम् तत्पाद युग्मसरसीरुह भृङ्गराजम् ।
त्रैय्यन्त युग्म कृतभूरि परिश्रमंतं श्रीरङ्गलक्ष्मण मुनिं शरणं प्रपद्ये ॥

श्रीमच्छ्रीवासयोगीश्वर मुनिकरुणालब्ध वेदान्तयुग्मं
श्रीमद्वेदान्तरामानुजगुरुपदयोरर्पितस्वात्मभारम् ।
श्रीमच्श्रुत्यन्तरामानुजयतिनृपतेः प्राप्तमोक्षाश्रमं तं
श्रीमच्छ्रीवासरामानुजमुनिमपरं संश्रयेज्ञानवार्धिम् ॥

श्रीमद्वेदान्तरामानुजमुनिकरुणालब्ध वेदान्तयुग्मं
श्रीमच्छ्रीवासयोगीश्वर गुरुपदयोरर्पितस्वात्मभारम् ।
श्रीमच्छ्रीरङ्गनाथाह्वयमुनिकृपया प्राप्तमोक्षाश्रमं तं
श्रीमद्वेदान्तरामानुजमुनिमपरं संश्रये देशिकेन्द्रम् ॥

श्रीमद्वेदवतंसलक्ष्मणमुनेः प्राप्तागमान्तद्वयं
तेन श्रीरघुपुङ्गवांघ्रियुगले न्यस्तात्मरक्षांभरं ।
श्रीमच्छ्रीनिधियोगिवर्य करुणालब्धाब्जचक्राङ्कनं
वन्दे शान्तिविराक्तिपूर्ण मनघं श्रीरङ्गनाथं गुरुम् ॥

श्रीमद्वेदान्तरामानुजयतिनृपतेर्लब्धवेदान्तयुग्मं
श्रीमद्देवाधिनेतुश्चरणसरसिजे तेन दत्तात्मभारं ।
श्रीमच्छ्रीवासयोगीश्वर महितमहासंप्रदायैकनिष्ठं
वन्दे श्रीवासयोगीश्वरगुरुमनघं वत्सलं भव्यशीलं ॥

श्रीमच्छ्रीवासयोगीश्वरपदविनतं लब्धवेदान्तयुग्मं
श्रीपादूसेविरामानुजमुनितिलकात्तत्पदन्यस्तभारम् ।
श्रीमच्छ्रीवासरामानुजमुनिमणेर्लब्ध मोक्षाश्रमं तं
श्रीमद्वेदान्तरामानुजयतिनृपतिं संश्रये ज्ञानवार्धिम् ॥

श्रीमच्छ्रीवासयोगिप्रवरसकरुणापाङ्गसङ्गादभङ्गात्
वेदान्तद्वनद्वविद्या मधुरसलहरीचञ्चरीकायमाणः ।
तेनाचार्येण रङ्गप्रभुचरणयुगेदत्तरक्षाभरश्रीः
श्रीमच्छ्रीवासरामावरजमुनिमणिस्सन्ततं श्रेयसेस्यात् ॥

श्रीमन्नाथमुनीन्द्रयामुनमुनिश्रीसंयमिन्द्रात्मनः
श्रीश्रीवासमुनीन्द्रदेशिकमणेः प्राप्तागमान्तद्वयम् ।
श्रीरङ्गेशपदे तदर्पितभरं श्रीपादुकासेवक
श्रीरामानुजयोगिनं गुरुवरं वन्दे दयासागरम् ॥

श्रीरङ्गेशपदे समर्पितभरं शृत्यन्तरामानुज
श्रीयोगीन्द्रगुरुत्तमेन यमिनश्शृत्यन्तविद्यात्मनः ।
प्राप्तशृत्यवतंसयुग्महृदयं श्रीवासरामानुजात्
श्रीश्रीवासमुनीन्द्रदेशिकमणिं श्रेयोनिधिं संश्रये ॥

श्रीमद्गोपालसूरेर्निरवधिकरुणावाप्तसत्संप्रदायं
श्रीमद्वेदान्तरामानुजयतिनृपतिस्सर्वतःस्थापयित्वा ।
यस्मिन्सत्संप्रदायं सकलमुपदिशन्नंशतोऽनुप्रविष्टः
श्रीमच्छ्रीवासरामानुजमुनिमनघं तंभजेदेशिकेन्द्रम् ॥

गोपालदेशिकपदाब्जमधुव्रतस्य प्रज्ञाविरक्तिकरुणामुखसगुणाब्धेः ।
वेदान्तलक्ष्मणमुनेश्रितभागधेयं पादारविन्दयुगलं शरणं प्रपद्ये ॥

श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम् ।
त्रय्यन्तदेशिक यतीन्द्र शठारि मूर्तिं गोपालदेशिकशिखामणि माश्रयामः ॥

श्रीरङ्गनाथगुरुपादसरोजहंसं वेदान्तदेशिकपदाम्बुजभृङ्गराजम् ।
श्रीमद्यतीन्द्रशठकोपदयावलम्बम् वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ॥

कल्याणावहमस्माकं कारुण्यकलशाम्बुधेः ।
प्रपद्ये रङ्गनाथस्य पदपङ्कजतल्लजम् ॥

श्रीवीरराघवगुरोस्तनयं ततश्च
शारीरकादि समधीत्य समस्तशास्त्रम् ।
विद्योतमानमनवद्यगुणैकतानं
श्रीरङ्गनाथगुरुवर्यं महं प्रपद्ये ॥

श्रीवेङ्कटेशगुरुणा करुणाकरेण
श्रीशेसमर्पितभरं श्रितपारिजातम् ।
श्रीरङ्गनाथगुरुवीक्षण लब्ध बोधम्
श्रीवीरराघवगुरुं शरणं प्रपद्ये ॥

वत्सवंशपयोधीन्दोः कल्याणगुणवारिधेः ।
श्रीमतोवेङ्कटेशस्य चरणौ शरणं भजे ॥

श्रीमतो रङ्गनाथस्य गुणैर्दास्य मुपागतम् ।
रामानुजं द्वितीयं तमद्वितीय मुपास्महे ॥

श्रीतातगुरुसेवात्तवेदान्तयुगलाशयः ।
वात्स्यानन्तगुरूःश्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

श्रीशैलपूर्णकुलवारिधिपूर्णचन्द्रं श्रीश्रीनिवास गुरुवर्यपदाब्जभृङ्गम ।
श्रेयोगुणाम्बुनिधिमाश्रितपारिजातं श्रीतातयार्यमनघं शरणं प्रपद्ये ॥

श्रीमच्छठारिमुनिपाद सरोजहंसं श्रीमत्परांकुशतपोधन लब्धबोधम ।
श्रीमन्नृसिँहवरदार्य दयावलम्बं श्रीमत्परांकुशमुनिँ प्रणतोस्मि नित्यम् ॥

श्रीमद्वरदविष्ण्वार्य पदपङ्कजषट्पदम् ।
अहोबिल गुरुं वन्दे वत्सवंशैकमौक्तिकम् ॥

महादयाधीशुतुरम्बुजाक्षनिध्यान नित्याभिनिविष्टबुद्धेः ।
अज्ञाननिग्राहकमञ्चसाऽहमस्मद् गुरोरंघ्रियुगं प्रपद्ये ॥

महादयाधीशगुरोस्तनयं तत्वविद्वरम् ।
वन्दे वरदविष्ण्वार्यँ वात्सल्यादि गुणार्णवम् ॥

नमो वरदविष्ण्वार्य नयनानन्ददायिने ।
वात्स्याय वरदार्याय वादिनीहारभास्वाते ॥

पर्यायभाष्यकाराय प्रणतार्ति विधून्वते ।
ब्रह्मतंत्रस्वतंत्राय द्वितीयब्रह्मणे नमः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

यस्मादस्माभिरेतद्यतिपति कथितप्राक्तनप्रक्रियोद्य-
त्कर्मब्रह्मावमर्श प्रभवबहुफलं सार्थमग्राहि शास्त्रं ।
तं विष्वग्भेद विद्यास्थिपदविषयस्थेयभूतम्
प्रभूतम् वन्देयात्रेयरामानुज गुरुमनघं वादिहंसाम्बुवाहम् ॥

रामानुजार्यतनयं रमणीयवेषमात्रेयमात्मगुरुपूर्णमनघर्शीलम् ।
श्रीरङ्गराजमिवतययाऽवतीर्णं श्रीरङ्गराजगुरुवर्यमहं प्रपद्ये ॥

आत्रेयगोत्राम्बुधिपूर्णचन्द्रं आचारयुक्तात्मगुणोपन्नम् ।
नतार्तिहृद्देशिक रत्नसूनुं रामानुजार्यं गुरुमाश्रयामः ॥

आत्रेयगोत्रसंभूतमाश्रये श्रितवत्सलम् ।
यतीन्द्रमहानासिकं प्रणतार्तिहरं गुरुम् ॥

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयतिसूक्तिः स्वाधीनपतिकां श्रुतिम् ॥

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये ।
येन विश्र्वसृजो विष्णोरपूर्यत मनोरथः ॥

विगाहे यामुनं तीर्थं साधुबृन्दावने स्थितम् ।
निरस्तजिह्मगस्पर्शे यत्र कृष्ण कृतादरः ॥

अनुज्झितक्षमायोग मपुण्यजनबाधकम् ।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे ॥

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम् ।
शुद्धसत्वमयं शौरैरवतार मिवापरम् ॥

नाथेनमुनिना तेन भवेयंनाथवानहम् ।
यस्य नैगमिकंतत्वं हस्तामलकतां गतम् ॥

यस्य सारतस्स्रोतो वकुलामोदवासितन् ।
श्रुतीनां विश्रामायालं शठारिं तमुपास्महे ॥

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्र्वमेतद व्यवस्थितम् ॥

सहधर्मचरींशौरे स्सम्मन्त्रित जगद्धिताम् ।
अनुग्रहमयीं वन्दे नित्यमज्ञात निग्रहाम् ॥

कमप्याद्यं गुरुंवन्दे कमलागृहमेधिनम् ।
प्रवक्ताछन्दसांवक्ता पञ्चरात्रस्य यःस्वयम् ॥

विगाहे निगमान्तार्यविष्णुपाद समुद्भवाम् ।
रहस्यत्रयसाराखयां तिस्रोत समकल्मषाम् ॥

अविज्ञातं विजानतां विज्ञातं अविजानताम् ।
रहस्यत्रयसाराखयां परंब्रह्मास्तु मे हृदि ॥

சீரொன்று தூப்புல் திருவேங்கடமுடையான்
பாரொன்றச்சொன்ன பழமொழியுள் - ஓரொன்று
தானேயமையாதோ தாரணியில் வாழ்வார்க்கு
வானேறப் போமளவும் வாழ்வு .

वैशाखे रोहिणीजातं काश्यपान्वयवारिधेः ।
इन्दुं श्रीपुण्डरीकांशं गोष्ठीपूर्णमहं भजे ॥

श्रीमते श्रीरङ्गरामानुज महाद्शिकाय नमः
श्रीमते श्रीनिवासरामानुज महाद्शिकाय नमः
श्रीमते श्रीवेदान्तरामानुज महाद्शिकाय नमः
श्रीमते श्रीरङ्गनाथ महाद्शिकाय नमः
श्रीमते श्रीनिवास महाद्शिकाय नमः
श्रीमते श्रीवेदान्तरामानुज महाद्शिकाय नमः
श्रीमते श्रीनिवासरामानुज महाद्शिकाय नमः
श्रीमते श्रीपादुकासेवकरामानुज महाद्शिकाय नमः
श्रीमते श्रीनिवास महाद्शिकाय नमः

श्रीमते श्रीनिवासरामानुज महाद्शिकाय नमः
श्रीमते श्रीवेदान्तरामानुज महाद्शिकाय नमः
श्रीमते गोपालार्य महाद्शिकाय नमः
श्रीमते श्रीवेदान्तरामानुज महाद्शिकाय नमः
श्रीमते श्रीरङ्गरामानुज महाद्शिकाय नमः
श्रीमते ब्रह्मतन्त्र स्वतंत्राय महाद्शिकाय नमः
श्रीमते निगमान्त महाद्शिकाय नमः
श्रीमते भगवते भाष्यकाराय महाद्शिकाय नमः
श्रीमते महा पूर्णाय नमः
श्रीमते यामुन मुनये नमः
श्रीमते राममिश्राय नमः
श्रीमते पुन्डरीकाक्षाय नमः
श्रीमते नाथमुनये नमः
श्रीमते वकुलभूषण महाद्शिकाय नमः
श्री रङ्गनायक्यै नमः , श्री रङ्गनाथ परब्रह्मणे नमः श्रीरङ्गनाथ दिव्यमणि पादुकाभयां नमः
श्रीमत्यै गोदायै नमः
श्री अलमेलुमङ्गा नायिकासमेत श्री श्रीनिवास परब्रह्मणे नमः
श्री पेरुन्देवीनायिकासमेत श्रीप्रणतार्तिहरवरद परब्रह्मणे नमः
श्री कोमलवल्ली नायिकासमेत श्री आरावमुद परब्रह्मणे नमः
श्री अरविन्दवल्ली नायिकासमेत श्री बद्रीनारायण परब्रह्मणे नमः
श्री रुक्मिणी सत्यभामा समेत श्री वेणुगोपाल परब्रह्मणे नमः
श्री अम्बुजवल्ली नायिकासमेत श्री भूवराह परब्रह्मणे नमः